## Ravideva (Kerala, 9th-10th c.), *Rākṣasakāvya* with *ṭīkā*

Christophe VIELLE, University of Louvain

The *Rākṣasakāvya* (sometimes given as *Kāvyarākṣasa*) is a short, trickily convoluted, lyric nature poem in 20 stanzas, seen by D. R. Mankad (see ref. M below) as a fine specimen of *paryāyakāvya* (according to Abhinavagupta). On manuscript evidence, following P. K. Gode,[1] it must be dated before AD 1000. It is ascribed to one Ravideva from Kerala (*malayadeśa-janman*, in the colophon here given), whom I propose, like M. Winternitz, to identify with Ravi, the father of the *yamaka*-poet Vāsudeva, being possibly also the "friend of [king] Kulaśekhara".[2]

The text has been here established on the basis of Hoefer's text (*editio princeps*) compared with the text of several other available editions or manuscripts (see list infra). Each stanza is followed by a critical apparatus in Roman script with the variant readings. The text of the *ṭīkā* (whose ascription to the poet himself remains doubtful in its present state)[3] relies on Hoefer's edition only, slightly corrected when needed, and with a few additions in brackets ('< >').

Sigla:

H = *Kāvyarākṣasaṃ saṭīkam*, ed. Karl Gustav HOEFER, *Sanskrit Lesebuch mit Benutzung handschriftlicher Quellen*, Berlin : Besser, 1849, pp. 86-93.

C = *Rākṣasakāvyam*, ed. Johannes HÄBERLIN, *Kāvyasaṃgrahaḥ*, Calcutta, 1861 (VS 1918), pp. 586-589 (= 2nd augm. ed. of Id., *Kávya-sangraha*, Calcutta : W. Thacker, 1847).

K = *Vidvadvinodakāvyam*, ed. Haridas Hirachand, *Kavya Kalapa, Number First*, Bombay : Ganpat Krishnaji's Press, 1864, pp. 137-139.

---

[1] See P. K. Gode, "Date of Rākṣasa Kāvya or Kāvyarākṣasa — Before A.D. 1000", *Journal of Indian History*, Madras, vol. 19/3, 1940, pp. 312-319, repr. in Id. *Studies in Indian Literary History*, vol. 1, Bombay (Bharatiya Vidya Bhavan, Shri Bahadur Singh Singhi Memoirs no. 4), 1953, pp. 195-202.

[2] See on the problem, K. Kunjunni Raja, *The Contribution of Kerala to Sanskrit* Literature, 2nd ed., University of Madras (Madras University Sanskrit Series no. 23), 1980, pp. 6 and 22-23. Note the use here, in stanzas 1, 5, 16 and 20, of the rare word *nā* "man" (*nṛ*) also used in *Yudhiṣṭhiravijaya* 8.15 (*nā kau kaḥ*), *Tripuradahana* 2.50 (*śubhakarmā nā*), *Śaurikathodaya* 3.30 (*adhiko nā mānyaḥ*) and *Nalodaya* 1.2 (*yo jani nā*), all works ascribed to Vāsudeva (or Ravideva).

[3] Both the text and the *ṭīkā* are ascribed to Ravideva in the colophons of the Mss. of Berlin (Cat. Weber 1853, p. 170 no. 580, cf. ed. Hoefer), Jammu (Cat. Stein p. 72 no. 1116 = S.RanbirS.R.I. Descr. Cat. II, 1973, pp. 318-9 no. 139 – the text itself of the colophon of "Jammu MS. no. 1118 [sic]" is to be found in Keith Cat. IO 1935 II, p. 1116 fn. 1, therefrom reproduced by Gode *JIH* 19, 1940, p. 317 fn. 1 = *St. Ind. Lit. Hist.* I 1953, p. 200 fn. 1), Poona (B.O.R.I. Descr. Cat. 13/2, 1942, p. 275 no. 610 = Peterson's Report VI 1895-98, p. 87 no. 328), and also, following the NCC (23, 2011, p. 194) where Ravideva's commentary is entitled *Sajjanānandadāyinī*, Ahmedabad (L.D.I. Cat. II 1965, pp. 642-3 no. 5011), Baroda (Alph. Ind. II 1950, pp. 1032-3 no. 638), Hoshiarpur (V.V.R.I. Cat. I 1959, p. 225 no.? 5 mss.), Jaipur (R.O.R.I. Cat. XI 1984, p.? no. 3635), Lahore (PUL Cat. II 1941, p. 265 no. 4560-61) and Ujjain (Cat. II 1941, p. 32 no.?). Is is has been made recently possible to check online the five mss. previously in Hoshiarpur and now in Lalchand Research Library, DAV College, Chandigarh: in fact only the mss. no. 772 and 5431, both ones originally from Lahore, have the Ravideva ascription (see http://www.dav.splrarebooks.com/collection/view/Rakshasakavya-Sateekam1 and 3: *iti śrīmahākavinā malayadeśajanmanā śrīravidevena viracitaṃ rākṣasakāvyaṃ vi*[*ṃśati*]*hṛdyapadyasametaṃ budhajanamanasānandadāyinī rākṣasakāvyaṭīkā ca samāptā*, with emendation = same as in the Jammu ms., that is a synthetic colophon, so slightly differing from the distinct ones – one for the poem and the other for the commentary, as edited here); the three other not (that is the no. 739, 777 – despite the fact that the decriptive labels of both give Ravideva as the *granthakarttā*, and 5089).

J = *Rākṣasakāvyam*, ed. Pandit Jibananda Vidyasagara, *Kavyasangraha*, Calcutta : New Indian Press, 1872, pp. 572-576 (based on C; Jc = new ed. ['3rd'] by the same together with his own *vyākhyā*, *Kāvyasaṃgrahaḥ*, vol. 3, Calcutta : Sarasvati Press, 1888, pp. 343-353, repr. 1900 and 1907).

P = *Rākṣasakāvyam*, *saṭīkam*, ed. Kāśīnāth Pāṇḍuraṅg Parab, Bombay : Nirnaya Sagar Press, 1911 ('3rd ed.'; 1st ed. in 1890, 2nd in 1900, 4th in 1917, 6th in 1935; apparently a very first ed. by the same with the title *saṭīkaṃ niśacarakāvyam* was already issued in *śake* 1806 = AD 1885).

M = *Buddhivinodakāvyam* [*saṭīkam*], ed. D.R. Mankad, "Buddhivinodakāvyam (A specimen of Paryāyakāvya)", *Indian Historical Quarterly* 12, 1936, pp. 692-700.

D = [*Rākṣasakāvyam*], Dacca Ms. collated by S.K. De, "On the Identity of the Buddhi-vinoda-kāvya", *IHQ* 13, 1937, pp. 172-176.

T = *Rākṣasakāvyam* [*saṭīkam*], ed. Pandit Tediyūr S. Kṛṣṇamūrti Śāstrī, Thanjavur : Tanjore Sarasvati Mahal Library Series no. 377, 1997.

U = *Kāvyarākṣasam* [*saṭīkam*], University of Pennsylvania Ms. Col. 390, item 1505, online: http://hdl.library.upenn.edu/1017/d/medren/9967589903503681

The following editions have not been collated:

• lith. ed. with an anonymous gloss, 10 ff, Benares, VS 1931 = AD 1874, and VS 1942 = AD 1885;

• Bombay ed. with Sanskrit commentary and Hindi transl., 31 pp., *śake* 1816 = AD 1895 (Cat. Barnett BM 1892-1906, p. 284), apparently the same as the one thereafter issued at the Lakṣmīveṅkaṭeśvara Press, VS 1959 = AD 1902, and the Śrīveṅkaṭeśvara Press, VS 1972 = AD 1915;

• ed. with Hindi transl. and com., Narsinghpur : Sarasvati Vilasa Press, 1908 (Cat. IO 1951, p. 1310);

• ed. with an Hindi word-by-word interpretation and translation and an English translation by Raja Pṛthvīpāla Siṃha of Surajpur, and a Sanskrit commentary by Sītārāma Śāstrī, Allahabad : Indian Press, VS 1966 = AD 1909 (Cat. Barnett BM 1906-28, pp. 840-1, IO 1951, p. 1310);

• ed. in Telugu script, with a Telugu commentary, Madras : Vavilla Press, 1926 (Cat. IO 1951, p. 1310);

• ed. with commentary by Yaska Śrīnavakiśorakara Śāstrī, Benares : Chowkhamba Sanskrit Series Office, Haridas Sanskrit Series no. 73, 1938 (VS 1995), 2nd ed. 1965.

There is also a valuable Italian translation and commentary by Ferdinando Belloni-Filippi, "Il Poema Demoniaco (Rākṣasakāvyam)", issued in the *Giornale della società america asiatica italiana* 19, 1906, pp. 83-102.

# अथ राक्षसकाव्यं सटीकम् ।

**कश्चिद्वनं बहुवनं विचरन्वयःस्थो**
**वश्यां वनात्मवदनां वनितां वनार्द्राम् ।**
**तर्वर्यरिप्रदमुदीक्ष्य समुत्थितं खे**
**ना गामिमां मदकलः सकलां बभाषे ।।१।।**

— vayaḥstho H T (*com.*) : vayastho C J (D) M K P T U ||

श्रीगणेशाय नामः । कश्चिदिति । **कश्चिद्** अनिर्दिष्टनामा पुरुषः । **वनं** काननम् । बहुतरं वनम् उदकं यत्र तद् **बहुवनम्** । **विचरन्** भ्रमन् । **वयःस्थो** वयसि स्थितो युवा । **वश्यां** भार्याम् । किंविशिष्टाम् । **वनात्मवदनाम्** । वनं पानीयम् । तद् आत्मा यस्य स चन्द्रमाः । <क्षीरोदमथनोत्पत्तेः ।> तेन तुल्यं वदनं यस्याः सा वनात्मवदना । तां चन्द्रवदनामित्यर्थः । **वनितां** स्त्रियम् । **वनार्द्रां** पानीयेनार्द्राम् उक्षिताम् । **तर्वर्यरिप्रदं** मेघम् । तरवो वृक्षाः । तेषामरिरग्निस्तर्वर्यरिः । तस्याप्यरिरुदकम् । तत् प्रददातीति तर्वर्यरिप्रदो मेघः । तम् **उदीक्ष्य** दृष्ट्वा । **समुत्थितं** समुत्पन्नम् । **खे** – आकाशे । **ना** पुरुषः । **मदकलो** हर्षविभ्रमः । **गां** वाचम् <**इमां सकलां**> समस्तां **बभाषे** – उक्तवान् ।।१।।

**पश्याब्जदृग्गिरितटेषु कुमातृसाह्वान्**
**भूदेवराजरिपुशत्रुसमावधूतान् ।**
**वैश्वानरारिजरिपुघ्नशराभिभूतैर्**
**दृक्श्रोत्रशत्रुभिरुपासितपुष्पशोभान् ।।२।।**

— +abja- : +ambu- M | upāsita : upāśrita T ||

पश्याब्जदृगिति । हे **अब्जदृक्** पद्मलोचने । **गिरितटेषु** पर्वतान्तेषु । <**कुमाता**> कुत्सिताम्बा । तत्समाना – **आह्वा** येषां तान् कदम्बानित्यर्थः । **भूदेवा** ब्राह्मणाः । तेषां **राजा** सोमः । तस्य **रिपु**र्मेघः । <आच्छादकत्वात् ।> तस्य **शत्रु**र्वातः । <विक्षेपणत्वात् ।> तेनावधूतान् <**समं** सम्यक्> कम्पितानित्यर्थः । **वैश्वानरो** ऽग्निः । तस्या**रि**रुदकम् । तत्र **जा**तो मत्स्यः । त**द्रिपुः** कैवर्तः <झषाशनः शम्बरासुरः> । तस्य **घ्न**तकः कामः <झषध्वजः प्रद्युम्नः> । तस्य **शरैरभिभूतैर्दृक्श्रोत्रशत्रुभिः** <चक्षुःश्रवोभुजैर्> मयूरैः । <तैः> सेवित**पुष्पशोभान्** <। **उपासिता** कुसुमश्री येषां तान् कदम्बान् **पश्य**> ।।२।।

**पश्याद्रिसारसदृशीभिरमूभिरद्भिर्**
**आप्लावयत्यमरगुब्धरणीमहिघ्नः ।**
**अब्दः सिताभिरसितः शबलः खगाभिर्**
**वार्जैः सितैरिव विभाति वनं प्रबुद्धैः ।।३।।**

— adri- : abdhi- T | -dṛśī° : -dṛśā° T | dharaṇīm ahighnaḥ : dharaṇīṃ mahimnas C J | śabalaḥ : °laṃ P | -gābhiḥ : -gībhiḥ D | vanaṃ : vana- T ||

पश्याद्रीति । <हे बाले **पश्य** । **अद्रिसारसदृशीभिः**> पर्वतसारतुल्याभिः । **अमूभिः** प्रत्यक्षाभिः । **अद्भिर्**स्तोयैः । **आप्लावयति धरणीम्** । अमरगुप् शक्रः <देवपतिः> । अहिं वृत्रं हतवान् **अहिघ्नः** । **अब्दो** मेघः । **सिताभिः** शुक्लाभिः <खगाभिर्> आकाशगाभिर्बलाकाभिः । **असितः** कृष्णः **शबल**श्चित्रः । वार्जैः <अब्जैः> कुमुदैः **सितैर्वनं** पानीयं यथा **विभाति** <**प्रबुद्धैर्**> विकसितैः, तथायं <मेघो> विभाति ।।३।।

**गोष्ठं घृतं सुघृतवाड्भिरमूभिरग्र्यं**
**गोभिः समुद्धरति यद्बहुधा हिमघ्नः ।**
**तद्गव्यमम्बरगतं शिखिजात्मसंस्थं**
**विष्यन्दमानमभिवर्धयतीह गोजान् ।।४।।**

— -vāḍbhiḥ H C J D U : -vadbhiḥ M K P T | amūbhir H C J D U : amībhir M K P T | agryaṃ : agnyaṃ C J | viṣyanda° H : visyanda° C J D U, nisyanda° P, vispanda° M K T ||

गोष्ठं घृतमिति । गवि तिष्ठतीति **गोष्ठम्** । **घृतं** पानीयम् । सुष्ठु घृतं वहन्तीति **सुघृतवा**हा रश्मयः । <**अमूभिस्**> ताभिः । अग्रेभवम**ग्र्यम्** । **गोभिः** – रश्मिभिः । <**यद्**> **समुद्धरति** – आकर्षति । **बहुधा** बहुप्रकारम् । **हिमघ्नो** रविः । गोषु रश्मिषु भवं **गव्यं** नीरम् । **अम्बरगत**माकाशगतम् । शिखी वह्निः । तज्जो धूमः । स आत्मा यस्य स मेघः । तत्रस्थं **शिखिजात्मसंस्थम्** । **तद्** घृतं **विष्यन्दमानमिह** भूतले । गोजान् <गवि भूमौ जातांस्> तृणादीन् **अभिवर्धयती**ति पश्य।।४।।

**अब्रुद्दलाशनिभदृग्घनजात्मवक्त्रा**
**वार्चस्वरेभनिभगा गजदोःसमोरुः ।**
**सीरिध्वजप्रसवतुल्यविषाह्वदासौ**
**न्रा संगता प्रमुदिता प्रसमीक्ष्य वार्दम् ।।५।।**

— abruṭ- C J D M K P T U : abrū- H | vārca- C J D P T U : cārva- H, vārva- M K | -ūruḥ H Jc D U : -ūrūḥ C J M P, -ūrū K | sīri- : sīra- M K | -dā+ : -dhā+ D | nrā saṃgatā : nāśaṃ gatā- Jc ||

अब्रुद्दलाशेति । **अब्रुद्दलाशनिभदृक्** । अप्सु रोहतीत्यब्रुट् कमलम् । <तस्य पलाशं तन्निभे दृशौ यस्याः सा ।> **घनजात्म**वदना । घने <जीमूते> जातमुदकं घनजम् । <तद् आत्मा त्मा यस्य स चन्द्रः । तेन तुल्यं **वक्त्रं** यस्याः सा ।> **वार्चस्वरा** हंसस्वरा । <वारि चरतीति वार्चः ।> इभेन निभं गमनं यस्याः सा – **इभनिभगा** । **गजदोःसमोरुः** – इभकरसमानावूरू <यस्याः सा> । **सीरिध्वजप्रसवतुल्यविषाह्वदा** – **असौ** । सीरी बलभद्रः । तस्य ध्वजस्तालः । तत्प्रसवानि फलानि । तत्तुल्यौ विषाह्वदौ क्षीरदौ स्तनौ यस्याः सा । <विषं पानीयमाह्वा नाम यस्य तद् विषाह्वं क्षीरम् ।> **न्रा संगता** पुरुषेण सहिता । **प्रमुदिता** प्रहृष्टा । **प्रसमीक्ष्य** दृष्ट्वा । **वार्दं** <जलदं> मेघम् ।।५।।

**सूर्यांशुनामपतिरुन्नतदृक्प्रगामी**
**वाङ्नामभिः परिवृतो विषनामदाभिः ।**
**उक्षा वरः प्रमुदितः प्रतिनानदीति**
**गर्जन्तमीक्षणहितोच्चयतुल्यरूपम् ।।६।।**

— -dṛk-pra- H : -dṛpta- C J D M K P T U | -gāmī : mānī D | vāṅ- : vāg- H C J | ukṣā H D : ukṣṇāṃ C J U, usrā- M K P T | varaḥ : -caraḥ T ||

सूर्यांशुरिति । सूर्यांशवो रश्मयः । तन् नाम विद्यते यासां ताः **सूर्यांशुनामा**नः । तासां **पति**र्वृषभः । **उन्नतदृक्प्रगामी** – अधोदृशं <मेघं प्रति> गच्छतीति । <**वाङ्नामभिर्**> वाचो नाम विद्यते यासां ताभिर्गोभिः **परिवृतो विषनामदाभिः** क्षीरदाभिः । विषं पानीयं तस्य नाम विद्यते यस्य तत् क्षीरम् । **उक्षा वरो** वृषभः । **प्रमुदितः** प्रहृष्टः । **प्रतिनानदीति** प्रतिस्पर्धया नदति । **गर्जन्तं** मेघम् । **ईक्षणहितोच्चयतुल्यरूपम्** । ईक्षणानि नेत्राणि । तेभ्यो हितमञ्जनम्, तेन – उच्चयो यस्य  सः – अञ्जनपर्वतः, तत्तुल्यं रूपं यस्य तम् । पश्येति संबन्धः ।।६।।

**एनं पयोदपतिरुन्नमितं पयोदं**
**खस्थं महीतलगतः प्रतिगर्जतीव ।**
**भित्त्वावनिं वनरुहाक्षि शिरोरुहाभ्यां**
**संप्रस्थितोऽमृतधरैरभिषिच्यमानः ।।७।।**

— -patir C J D M K P T U : -patim H | -namitam : °taḥ C J D | avaniṃ H P T : °nīṃ C J D M K U | - dharair C J D M K P T U : -carair H ||

एनमिति । हे **वनरुहाक्षि** कमललोचने पश्येति संबन्धः । **एनं पयोद**मुदकदं मेघम् **उन्नमितम्** अवलम्बमानं **खस्थ**माकाशस्थं **प्रति गर्जतीव पयोदपतिः** । पयोदाः क्षीरदा गावः । तासां पतिर्वृषभः । किंविशिष्टः । **महीतलगतः** – भूस्थः । किं कृत्वा । **भित्त्वा** विदार्य । **अवनिं** पृथ्वीं । काभ्याम् । **शिरोरुहाभ्यां** शृङ्गाभ्याम् । <**संप्रस्थितः**> स पथि स्थितः प्रवृत्तः । **अभिषिच्यमानः** <अभिवृष्यमाणः> कैः । **अमृतधरै**र्मेघैः । अमृतमुदकं <धरन्तीति> ।।७।।

**स्त्रोतोजविक्षतजभूधरधातुरूपाः**
**खस्थाः पयोजदलदृक्शुचिशुक्रमासे ।**
**मासोर्नभस्यनभसोरतिसंपतन्तस्**
**तीव्रं विषं विषधराः परिनिर्वपन्ति ।।८।।**

— sroto- C J D M K P T U : reto- H | payojadala- D M K P T : payodajala- H : payojalasa- C J | māsor : māse M K | -saṃpatantaḥ M K P T : -sampadantāḥ H, -saṃkṣarantaḥ C J U, saṃtapantaḥ D | pari- C J D M K T U : prati- H || [D changes the whole word-order]

स्त्रोतोजविक्षतेति । हे **पयोजदलदृक्** कमल<पत्त्र>लोचने <पश्य> । स्त्रोतसि जातं स्त्रोतोजं सुवर्णम् । विक्षताज्जातं विक्षतजं रुधिरम् । **भूधराः** पर्वताः । तेषां धातवो भूधरधातवः सुवर्णरौप्यादयः । तैस्तुल्यं रूपं येषां ते **स्त्रोतोजविक्षतजभूधरधातुरूपाः** । <**खस्था** आकाशे स्तिथाः ।> **शुचिशुक्रमासे** ज्येष्ठाषाढमासे । <**मासोर्**> **नभस्यनभसो**र्भाद्रपदश्रावणयोः । **अतिसंपतन्तः** संपत्तिमन्तः । **तीव्र**मसहम् । **विष**मुदकम् । **विषधरा** मेघाः । **परिनिर्वपन्ति** परिक्षिपन्तीत्यर्थः ।।८।।

**स्वयोनिभक्षध्वजसंभवानां**
**श्रुत्वा निनादं गिरिगह्वरस्थः ।**
**तमोऽरिबिम्बप्रतिबिम्बधारी**
**विरौति कान्ते पवनाशनाशः ।।९।।**

— virauti C J D M K P T U : ārauti H ||

स्वयोनिभक्षेति । **स्वयोनिभक्षो** वह्निः । <स्वजन्म – अधरारण्याम्, तां भक्षयति दहतीति सः ।> तस्य **ध्वजो** धूमः । त**द्भावा** मेघाः । तेषां **निनादं श्रुत्वा** <शब्दम्> आकर्ण्य । <**गिरि**>गुहासु **स्थितः** सन् । **तमसो ऽरि**श्चन्द्रमाः । <तस्य मण्डलमिन्दु**बिम्ब**म् ।> तद्रूपप्र**तिबिम्बधारी** <चन्द्रकवान्> । <**विरौति**> अतिनदति **पवनाशनाशो** <वायुभक्षभुग्> मयूरः । हे **कान्ते** पश्येति संबन्धः ।।९।।

गोष्ठश्चे कुङ्कुमवपुः प्रतिराजतेऽसौ
सप्ताद्रिदैत्यभुजगोत्तमशत्रुगोपः ।
उर्वीधराभमचिरोत्थितमब्धरं खे
दृष्ट्वाहिहा प्रमुदितो हिमहाह्वयानः ।।१०।।

— pratirājate : pravi° D | sapta- : sapty- P T | abdharaṃ H Jc D : adhvaraṃ C J U, ambaraṃ M K P T | -āhvayānaḥ : -āhvayo ’bhūt D ||

गोष्ठश्चेति । गवि भूमौ तिष्ठतीति **गोष्ठः** । कुङ्कुमेन <वह्निशिखेन> सदृशं वपुर्यस्य स **कुङ्कुमवपुः** । <रक्तवर्ण इत्यर्थः ।> को ऽसौ **प्रतिराजते** शोभते । **असावि**ति प्रत्यक्षः । **सप्ताद्रिदैत्यभुजगोत्तमशत्रुगोपः** । अद्रयः पर्वताः । दैत्या असुराः । भुजगोत्तमाः सर्पश्रेष्ठाः । तेषां शत्रुरिन्द्रः । <तेन रक्षिताः प्रावृट्कालजा अतिरक्तवर्णाः कीटाः शक्रगोपका इन्द्रवध्व इति लोके । सप्ता भुक्ता इन्द्रगोपा येन स मयूरः ।> उर्वीधरः पर्वतः । तद्वद् आभा यस्य स **उर्वीधराभः** । तम**चिरोत्थित**मिदानीमेवोत्थितम् । अपो धरतीत्य**ब्धरो** मेघः । तं **खे** – आकाशे **दृष्ट्वा** । अहिः सर्पः, तं हन्तीत्य**हिहा** मयूरः । <**प्रमुदितः** प्रहृष्टः ।> **हिमहाह्वयानः** । <हिमहा हिमापहो ऽग्निः । अग्निराह्वा यस्य स स्कन्दो ऽग्निजः । तं वहतीत्याग्नेययानः> शिखी <। हे बाले पश्येति संबन्धः> ।।१०।।

**कृष्णोऽब्धरः क्षरति तोयमसावजस्रम्**
**अन्याविमौ रणगताविव चेभराजौ ।**
**अन्ये त्वमी द्विरदवृन्दनिभाः क्षरन्तः**
**प्रच्छादयन्त्यमरसिद्धविमानमार्गम् ।।११।।**

— kṛṣṇo ’bdharaḥ D : kṛṣṇābdharaḥ C J, kṛṣṇo ’mbaraḥ H M K P, kṛṣṇāmbaraḥ T | anyau : alpau C J | iva ca : iva vā T | tv amī : tu te C J | -siddha- : -vṛnda- C J D ||

कृष्णो ऽब्धर इति । **कृष्णो** नीलः । **अब्धरो** मेघः <**असौ**> । **क्षरति** वर्षति । **तोयं** पानीयम् । **अजस्रं** प्रभूतम् । **अन्याविमौ** – अपरावेतौ <मेघौ **च**> । **इभा** हस्तिनः । तेषां **राजानौ** । <**रणे** संग्रामे **गताविव** ।> अन्योऽन्यं स्पर्धमानावित्यर्थः । **अन्ये** अपरे <**त्वमी**> । **द्विरदा** हस्तिनः । तेषां **वृन्दं** <कुलम्> । तेन **निभाः** सदृशाः । **क्षरन्तो** वर्षन्तः । **प्रच्छादयन्ति** कम् । **अमरसिद्धविमानमार्ग**माकाशमित्यर्थः <। हे बाले पश्येति संबन्धः> ।।११।।

**वार्दाः खगाः क्षितिधरागमनप्रकाशा**
**नेमीभरासभतुरंगमतुल्यघोषाः ।**
**वाय्वीरिताः खमवतत्य वनं क्षरन्तो**
**वार्भिः क्षितिं घृतधराः परिणिर्वपन्ति ।।१२।।**

— avatatya vanaṃ : avataptavanaṃ M K ||

वार्दा इति । वार् ददतीति **वार्दा** मेघाः । खे गच्छन्तीति **खगाः** । येषामागमने क्षितिधराणां <पर्वतानां> प्रकाशाः <समानास्> ते **क्षितिधरागमनप्रकाशाः** । नेमी रथचक्रधारा । इभो हस्ती । रासभो गर्दभः । तुरंगमो ऽश्वः । तेषां तुल्यो घोषो ध्वनिर्येषां ते **नेमीभरासभतुरंगमतुल्यघोषाः** । **वाय्वीरिता** वायुना क्षिप्ताः । **ख**माकाशम् । **अवतत्य** व्याप्य । **वन**मुदकम् । **क्षरन्तो** वर्षन्तः । **वार्भिः** पानीयैः । **क्षितिं** पृथ्वीम् । घृतं पानीयम् । तद् धारयन्तीति **घृतधराः** । **परिणिर्वपन्ति** नयन्तीत्यर्थः <। हे बाले पश्येति संबन्धः> ।।१२।।

**एषोऽङ्घ्रिपाशनरिपुघ्नसुतारिसाह्वम्**
**आरुह्य तिष्ठति सुगात्रि भुजंगमारिः ।**
**यस्य स्वनैः प्रमुदितस्य ममाद्य बाले**
**तालध्वजावरजसूनुशराः पतन्ति ।।१३।।**

— ’ṅghri- C J D M K P T : ’ṃhri- H | svanaiḥ : svaraiḥ C J ||

एषो ऽङ्घ्रिपेति । **एष** इत्यादि प्रत्यक्षनिर्देशः । अङ्घ्रिपा वृक्षाः, तानश्नातीत्यङ्घ्रिपाशनो ऽग्निः । तस्य रिपुः पानीयम् । **अङ्घ्रिपाशनरिपुः** । तं हन्तीति **घ्न** आदित्यः । तस्य **सुतः** कर्णः । तस्या**रि**रर्जुनः । तेन **स**माना – **आह्वा** यस्य सो ऽर्जुनवृक्षः । तमा**रुह्य तिष्ठति** । <हे **सुगात्रि** ।> शोभनं गात्रं यस्याः सा सुगात्री । तस्यामन्त्रणं सुगात्रि । **भुजंगमाः** सर्पाः । तेषाम**रि**र्मयूरः । कथंभूतः । **यस्य स्वनैः** शब्दैः <**प्रमुदितस्य**> प्रहृष्टस्य **मम** । **अद्य** – अस्मिन्नहनि । <हे> **बाले** प्रिये <पश्य> । **तालध्वजो** बलभद्रः । तस्या**वरजो** ऽनुजः कृष्णः । त**त्सूनुः** <प्रद्युम्नो> मदनः । तस्य **शराः पतन्ति** व्यथयन्तीत्यर्थः ।।१३।।

**उस्राविषं स्थलगतोऽत्ति तथैव वार्जो**
**वार्भ्यो द्विजो हरिदृगेष दशार्धगूढः ।**
**वाताशनः खशयनः स्मरति स्थलस्य**
**चक्षुःश्रवा वनभयात्सुरशत्रुनामा ।।१४।।**

— usrā- : usro Jc, uṣṭrā- D, jasrā- M K | tathaiva : visṛṣṭa- P | (vārjo *om.*) vārbhyo H : vārbhyo vārjo C J D M K P T U | haridṛg (harita Jc) eṣa daśārdhagūḍhaḥ H C J D U : svapitṛbhīruviṣaprahīṇaḥ M K P T | khaśayanaḥ Hc C J D M K P T U : °naṃ H Jc | -bhayāt : -bhavaḥ D, -bhavā- M ||

उस्राविषमिति । **उस्रा** गावः, तासां **विषं** गोमयं <क्षीरं वा> । यथा **स्थलगतः** <भूमिशयः क्षितिजः> कीटः <इव गोमयम्> **अत्ति** भक्षयति, **तथैव** <**वार्जो** जलजः क्षीरोदधाव्> अवतीर्णः <क्षीरं> खादति । को ऽसौ । **द्विजः** कच्छपः । हरिर्वानरः <विष्णुर्वा> । तेन तुल्या दृग् यस्य स भवति **हरिदृक्** । <हरितवर्णः काश्यपीगो हरिस्वरूपो वा कूर्मावतार इति श्लेषः ।> **एष** इति प्रत्यक्षनिर्देशः । **दशार्धगूढः** । पञ्चभिः <अङ्गैः> कच्छपो निगूढ इत्यर्थः । <कस्मात् पञ्चाङ्गगुप्तः सः ।> **वार्भ्यः** <मेघविसृष्ट>पानीयेभ्यः <वर्षेभ्यः> । <को ऽन्यः ।> **वाताशनः** <पवनाशनः> सर्पः । **खशयनः** – बिलशयः । **चक्षुःश्रवाः** <दृक्कर्णः> । **सुरशत्रुनामा** <अहिरित्याह्वा देवरिपोर्वृत्रस्य> । <अयं **वनभया**ज्जलभयहेतोः **स्थलस्य**> **स्मरति** <स्थलीयस्थानं> ध्यायति <। हे बाले पश्येति संबन्धः> ।।१४।।

**पक्ष्यश्वमेधतुरगप्रतिमोऽष्टवर्णो**
**वार्दं न बह्विति समाह्वयते ह्यहिघ्नः ।**
**भेकस्तथैव खशयाशयवेद्यवाणिः**
**शब्दं करोत्यतिभृशं विषराशिमग्नः ।।१५।।**

—pratimo ’ṣṭa- D K P T U : °bho ’ṣṭa- M, °moṣṭha- C J | na bahv iti D M K P U : na varṣati C J, navaṃ tv iti T (vanaṃ Tc) | khaśayāśayavedya- M K P T U : śvasanāśanavedya- D, pavanāśanavedya- C J (°vandya- Jc) | śabdaṃ : śakṣaṃ M | ati- : api C J || [H omits the stanza]

<पक्षीति । **पक्षी** मयूरः । **अश्वमेधतुरगप्रतिमः** । अश्वमेधो यज्ञविशेषः, तत्र तुरंगो विचित्रः सर्वरूपो ऽष्टमङ्गलः, तेन तुल्या प्रतिमा यस्य सो **ऽष्टवर्णः** । **वार्दं** मेघम् । न **बह्व**नलं मेघो वर्षती**ति हेतो**स्तं **समाह्वयत** आकारयत्य**हिघ्नः** सर्पाशन इत्यर्थः । **भेक**स्तु मण्डूकः । यथा मयूरस्त**थैव** स **शब्दं करोत्यतिभृशम्** । **खशयाशयवेद्यवाणिः** । खशयो बिलवासी भेकभुक् सर्पः, तस्याशयो बिलम्, तस्माद्वेद्या – उपलब्धा वाणिर्वाग्यस्य सः । **विषराशिमग्नः** । विषं पानीयम्, तस्य राशिर्निचयः, तत्र मग्नो निमज्जतीत्यर्थः । हे बाले पश्येति संबन्धः> ।।१५।।

**ना विष्किरावनमुपेत्य कुमातृसाह्वम्**
**आक्रीडते मधुकलोऽङ्गनया समेतः ।**
**अन्यस्त्वयं मणिवराभमुपेत्य गोजं**
**ना रामया सह पयःपतिजां वृणीते ।।१६।।**

— viṣkirāvanam (°vaṇam H C J D M K U) : viṣkiro va° Jc | tv ayaṃ H C J D U : svayaṃ M K P T ||

ना विष्किरावनमिति । **ना** पुरुषः । **उपेत्य** प्राप्य । विष्किराः पक्षिणः, तेषामवनं <तर्पणे रक्षायां वा> **विष्किरावनम्** <काननं नीडजस्थानम्> । किंसंज्ञाकम् । **कुमातृसाह्वं** कदम्बवनमित्यर्थः । **आक्रीडते मधुकलः** । <रति>मद्येन <कलो> विराजमान इत्यर्थः । <**अङ्गनया समेतः** – भार्यया युक्तः ।> **अन्यो** ऽपरः <**त्वयं** पुंस्पक्षी । विष्किरा हि मानुषमिथुनागमेन कदम्बवनाद् बहिर्गताः> । मणिवरः <हरितोपलि> इन्द्रनीलकः, तेन तुल्या – आभा यस्य तन् **मणिवराभम्** । दूर्वाशाद्वलमित्यर्थः । **उपेत्य** प्राप्य । **गोजम्** । गौः पृथ्वी, तस्यां जातं समुद्भूतं <इदं दूर्वावनम्> । **ना** <पुमान्> । **रामा** स्त्री । तया <पक्षिण्या> **सह** । **पयःपतिः** समुद्रः, तस्मिञ्जाता <लक्ष्मीः> । तां <तृणभूतां श्रियं> **वृणीते** संभुनक्ति ।।१६।।

**स्यूतं महत्क्षतजवर्णनिभं नरोऽसौ**
**बिभ्रत्त्वमूनि च भिनत्ति सरोरुहानि ।**
**तज्जेन चापि रजसा वनितां वयःस्थो**
**ऽप्यभ्युद्धरत्यवकिरत्यभिषिच्यमानः ।।१७।।**

— syūtaṃ C D T : sūtaṃ H M K, sthūlaṃ J, sūtraṃ P U | naro H C J P U : varo M K T | bibhrat tv D U : bibhraty H C J P, bibharty M K (*metr. incor.*), barbharty T | cāpi : vāpi T | vayaḥstho H T : vayastho C J (°sthaḥ Jc) (D) M K P U | ’py *om.* C J ||

स्यूतमिति । **स्यूतं** वस्त्रम् । किंविशिष्टम् । **महत्** <**क्षतजवर्णनिभं** च ।> क्षतजं रुधिरम्, तस्य वर्णस्तेन तुल्या निभा – आभा यस्य तत्तथा । **नरो ऽसौ बिभ्रत्तु** । <तद् वस्त्रं बिभ्राणः सन् पुरुष इत्यर्थः ।> **अमूनि च भिनत्ति सरोरुहाणि** । चशब्दः पादपूरणे । अमूनि – एतानि । भिनत्ति – उच्चिनोति । <सरसीरुंहि> कमलानि । तेषु जातं तज्जम् । **तज्जेन** <**चापि**> **रजसा** पद्मरेणुना । **वनितां** स्त्रियम् । **वयःस्थो** <वयसि स्थितो> युवा । किम् <**अपि**> करोतीत्याह । **अभ्युद्धरति,** <ताम् अर्दिधिषुस्तेन कौसुमेन> मुद्रयतीत्यर्थः । <तथा> **अवकिरति,** <शुक्रं> विक्षिपतीत्यर्थः । **अभिषिच्यमानः** कया । वनितया, क्रीडारसेन पानीयेन । अर्थवशाद् <इह> विभक्तिपरिणामः <। अभिवृष्यमाणो वा स मेघेनेत्यर्थवरः> ।।१७।।

**पङ्के निमग्नमिभवृन्दमदः सवारि**
**गर्जत्तिमिक्षयदवृन्दमिवावभाति ।**
**वार्यात्मनामशतचित्रतनुः सुपर्णो**
**योषिद्वृतः समदनः प्रतिरोरवीति ।।१८।।**

— garjat C J (D?) P T U : °jaṃs H, °jan M, °jaṃ K | +ātma-nāma-śata- : +ātmanām aśana- D, +ātmanaḥ śata- T | suparṇo J (D) M (°ṇaḥ) P T : suparṇī H C U | -vṛtaḥ : -dhṛtaḥ P | pratiroravīti H M P T U : pratirauravīti C J D P ||

पङ्के निमग्नमिति । **पङ्कः** कर्दमः । तस्मिन् **निमग्नम्** । **इभवृन्दं** हस्तियूथम् । **अदः** – एतत् । **सवारि** सजलम् । **गर्जद्** बृंहत् । **तिमिक्षयदवृन्दमिवावभाति** । तिमिर्मत्स्यः, तस्य क्षयो वास उदकमिति यावत् तद् ददतीति तिमिक्षयदा मेघाः । तेषां वृन्दं समूहम् <इव> । अवभाति शोभते । कृष्णतादिसाधर्म्यात् । <को ऽन्यः ।> **वार्यात्मनामशतचित्रतनुः** । वार्यात्मा चन्द्रमाः । तस्य नाम <येषां ते चन्द्रकाः, तेषां> शतेन चित्रा विचित्रिता तनुर्यस्य सः । **सुपर्णः** । शोभनानि पर्णानि पत्त्राणि यस्य सः । मयूर इत्यर्थः । **योषिद्वृतः** – मयूरीसहितः । **समदनः** – मदनेन सह वर्तमानः । कामाविष्टः <**प्रतिरोरवीति,** योषितं प्रति पुनः शब्दं करोत्यतिभृशम्> इत्यर्थः <। हे वनिते पश्येति संबन्धः> ।।१८।।

**विस्फोटिताब्धररवेण रिरंसुरेष**
**संत्रासितो हरिरनोकहनिष्कुटस्थः ।**
**संलीयते तडितमप्यभिवीक्ष्य विग्नः**
**खात्खं महत्तरमसौ समनुप्रविष्टः ।।१९।।**

— visphoṭitābdhara- : visphoṭitāmbara- H (-sphoṭinā°) M K P T, visphāritāmbuja- C J, saṃtrāsitābdhara- D | riraṃsur eṣa : ciraṃ sureśa- D | eṣa H C J D (U) : eva M K P T | saṃtrāsito : vi° Jc | -niṣkuṭasthaḥ H C J D : niṣkuṭīṣu M K P T | taḍitam apy abhivīkṣya vignaḥ H C J D U : taḍitam ābhimukhīṃ ca dṛṣṭvā M K P, hy abhimukhīṃ taḍitaṃ ca dṛṣṭvā T | khāt khaṃ H D T (U) : khāt saṃ- C J K, khaṃ khān P, śvāsaṃ M | °taram : °tamam D | samanu- : kham anu- C J | praviṣṭaḥ : pratiṣṭhaḥ M ||

विस्फोटितेति । **विस्फोटिताब्धररवेण** विसर्पितजलदनादेन । **रिरंसुरेषो** ऽनुकामः । **संत्रासित**श्चालितः । **हरि**र्वानरः । **अनोकहनिष्कुटस्थः** <वृक्षनिकुञ्जेषु> **संलीयते** । **तडितं** विद्युतम् <**अपि**> **अभिवीक्ष्य** दृष्ट्वा । **विग्नः** <भीतः> । **खात्खं** बिलाद् बिलम् । **महत्तरम्** अतिमहत् । **असौ** प्रत्यक्षः । **समनुप्रविष्टः** – दूरं प्रविष्ट इत्यर्थः <। हे वनिते पश्येति संबन्धः> ।।१९।।

**एतावदुत्तमवचः सुमनाः स उक्त्वा**
**रन्त्वा दिनं सह तया प्रियया ह्यदीनः ।**
**युक्तं चतुर्भिरनडुद्भिरदीनवाड्भिर्**
**आरुह्य यानमथ संप्रययौ स्वगेहम् ।।२०।।**

**इति श्रीमहाकविना मलयदेशजन्मना रविदेवेन विरचितं**
**राक्षसकाव्यं विंशतिहृद्यपद्यसमेतं समाप्तम् ।**

— sa uktvā C J D M K P T U : samuktvā H | priyayā hy : priyayāpy M K | anaḍudbhir : anaḍuḍbhir Hc C | -vāḍbhir H C J D : °vadbhir M K P T | nā prayayau C J : saṃprayayau H D M K P, sa prayayau T | yuktaṃ… nā : saṃprasthitaḥ svanagaraṃ prati cāruveśo devyā tayā rucirayā U | svageham : kṣayaṃ svayaṃ D (*metr. incor.*) ||

एतावदिति । **एतावद्** यथोक्तम् **उत्तमवचः** प्रकृष्टं वचनम् । शोभनं मनो यस्य भवति **सुमनाः** **सः** । **उक्त्वा** – अभिधाय । **रन्त्वा** क्रीडित्वा । **दिनं** दिवसम् । कया **सह** । <**तया**> **प्रियया** भार्यया सार्धम् । **हि**<शब्दः> पादपूरणे, अव्ययशास्त्रे । **अदीनः** – न दीनः, प्रहृष्टः । **युक्तं चतुर्भिरनडुद्भिर्** बलीवर्दैः । कथंभूतैः । अदीनं <श्रीमन्तं तं> वहन्तीत्यदीनवाहः, तैर**दीनवाड्भिः** । <**यानं** रथमा**रुह्य** ।> **अथ** – अनन्तरम् । <**ना**> पुरुषः । <**स्व**>**गेहं** मन्दिरं **प्रययौ** प्रयात इत्यर्थः ।।२०।।

इति श्रीमहाकविना श्रीरविदेवेन रचिता <कृष्णधरेण व्याळिना प्रपञ्चिता>
सज्जनमनआनन्ददायिनी राक्षसकाव्यटीका समाप्ता ।।